**संस्कृतवार्ता:**

**दिनाङ्क :-01.12.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री नरेन्द्रमोदी**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: ओडिशायाः भुवनेश्वर-नगरे आरक्षि-महानिदेशकानां महानिरीक्षकाणां च अखिल-भारतीय-सम्मेलने प्रतिभागम् अकरोत्। त्रि-दिवसीये सम्मेलने केन्द्रीय-गृहमन्त्री अमित-शाहः राष्ट्रिय-सुरक्षा-परामर्शदः अजित-डोभालः प्रधानमन्त्रिणः प्रधान-सचिवः पी.के. मिश्रा अन्ये च गणमान्याः अस्मिन् महत्त्वपूर्णे आयोजने प्रतिभागं कृतवन्त:। राष्ट्रिय-सुरक्षायाः सम्बद्धेषु विविध-विषयेषु चर्चायै वरिष्ठारक्षि-अधिकारिभ्यः सुरक्षा-सम्बद्ध- प्रशासकेभ्यश्च अयं महत्त्वपूर्ण-मञ्चः विद्यते। सम्मेलने आतंकवाद-वामपंथोग्रवाद-तटवर्तिसुरक्षा, मादक-पदार्थानां तस्करण-निराकरण-समेत्य नूतनापराधिक-विधिषु राष्ट्रिय-सुरक्षा-सम्बद्ध- महत्वपूर्णपक्षेषु ध्यान-केन्द्रितं क्रियते। अत्रावसरे विशिष्टसेवायै राष्ट्रपतिः आरक्षि-पदकानि अपि प्रदास्यन्ते।

**उपराष्ट्रपति**

उपराष्ट्रपति: जगदीपधनखडः अद्य उत्तरप्रदेशस्य कानपुरस्य यात्रायां भविष्यति,सः जयपुरिया विद्यालयस्य स्वर्ण जयंती उत्सवे मुख्यातिथिरूपेण भागं भजिष्यति। तदतिरिक्तं उपराष्ट्रपतिः कानपुरस्य भारतीय प्रौद्योगिकी संस्थानं अपि गमिष्यति, यत्र सः छात्रान् संकाय सदस्यान् च सम्बोधयिष्यति।

**महाराष्ट्रे-शपथग्रहणसमारोह**

महाराष्ट्रे नवनिर्वाचितस्य महायुतिसर्वकारस्य शपथग्रहणसमारोहः दिसम्बर् मासस्य पञ्चमे दिनाङ्के सायं पञ्च वादने मुम्बईनगरस्य आजाद उद्याने भविष्यति। वार्ताहरैः सह वार्तालापं कुर्वन् भाजपा महाराष्ट्रस्य अध्यक्षः चन्द्रशेखर बावनकुले उक्तवान् यत् प्रधानमन्त्री नरेन्द्र मोदी समारोहे भागं गृह्णीयात्। सद्यः एव जाते विधानसभानिर्वाचने भाजपा, दलं शिंदेनेतृत्वस्य शिवसेना, अजीतपवारस्य राष्ट्रवादीकाङ्ग्रेस (एनसीपी) इति दलानां महायुति संयुत्या अष्टाशीत्यधिक द्विशतासनेषु त्रिंशोत्तर द्विशतम् आसनानि विजितानि।

**नागालैण्ड-राज्य:**

नागालैण्ड् राज्ये अद्य द्विषष्ठिः तमः राज्यस्थापना दिवसः आयोज्यते। त्रिषष्ठ्योत्तरऊनविंशतिशततमे वर्षे अस्मिन् दिने एव नागालैण्ड् राज्यम् भारतस्य षोडशतमं राज्यम् अभवत्। नागालैण्ड्-देशस्य इतिहासे अस्य महत्त्वपूर्णस्य दिनस्य स्मरणार्थं राज्ये सर्वत्र आयोजनानां श्रृङ्खलायाः योजना कृता अस्ति। राज्यस्तरीयः उत्सवः कोहिमानगरस्य नागालैण्ड् नागरिकसचिवालयस्य प्लाजा इत्यत्र भविष्यति, यत्र मुख्यमन्त्री नेफ्यू रियो इत्येष: सभां सम्बोधयिष्यति, विगतषड्दशकेषु राज्यस्य यात्रायाः विषये चिन्तनं च करिष्यति।

**प्रधानमन्त्री-पृथ्वीन्द्र**

प्रधानमंत्री नरेन्द्र मोदी शोधकर्तुः डॉ. पृथ्वीन्द्र मुखर्जी वर्यस्य देहावसाने शोकं प्रकटितवान्। श्रीमोदी स्वसन्देशे अवदत् यत् डॉ. मुखर्जी बहुपक्षीयः व्यक्तित्वः आसीत्, यः बौद्धिकजगति दृढं चिह्नं चिंहितवान्। श्रीमोदी अवदत् यत् आगामिषु वर्षेषु तस्य कृतयः रचनाः च प्रशंसिताः भविष्यन्ति।

**चेन्नई-फेङ्गलचक्रवातः**

बङ्गालस्य दक्षिणपश्चिमखात्यां प्रचलितः फेङ्गलचक्रवातः गतसायं तमिलनाडु-पुडुचेरी-तटेषु प्रवेशं कृतवान्। महाबलीपुरम-पुडुचेरी-नगरयोः मध्ये प्रायः सायं सार्द्ध पञ्च वादने स्थलप्रवेशस्य प्रक्रिया आरब्धा । दिसम्बर मासस्य तृतीय दिनांक पर्यन्तं वर्षा भवितुं शक्नोति।

**हॉकी-जूनियर एशिया कपः**

ह्यः ओमानस्य मस्कट्-नगरे पुरुषाणां- कनिष्ठ-एशिया-चषक-क्रीडायां भारतीय-कनिष्ठ-पुरुष-हॉकी-दलेन चीनी-ताइपे-दलं पूल-ए-इति क्रीडायां षोडश शून्यं इत्यंकान्तरालेन पराजितम्।

**संस्कृत-साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादने भविष्यति। कृपया श्रृण्वन्तु।

**।।इति वार्ताः।।**